# Sandhyakritam Hari Stotram

# સન્ધ્યાકૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Sandhyakritam Hari Stotram

File name : haristotramsandhyAkRRitaM.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 22 shloka 51-68

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# સન્ધ્યાકૃતં હરિસ્તોત્રમ્

સન્ધ્યોવાચ -

નિરાકારં જ્ઞાનગમ્યં નરં ય-
ન્નૈવ સ્થૂલં નાપિ સૂક્ષ્મં ન ચોચ્ચૈઃ ।
અન્તશ્ચિન્ત્યં યોગિભિર્યસ્ય રૂપં
તસ્મૈ તુભ્યં હરયે મે નમોઽસ્તુ ॥ ૫૧॥

શિવં શાન્તં નિર્મલં નિર્વિકારં-
જ્ઞાનાત્પરં સુપ્રકાશં વિસારિ ।
રવિપ્રખ્યં ધ્વાન્તભાગાત્ પરસ્તા-
દ્રૂપં યસ્ય ત્વાં નમામિ પ્રસન્નમ્ ॥ ૫૨॥

એકં શુદ્ધં દીપ્યમાનં વિનોદં
ચિત્તાનન્દં સત્વજં પાપહારિમ્ ।
નિત્યાનન્દસત્યં ભૂરિપ્રસન્નં
યસ્ય શ્રીદં રૂપમસ્મૈ નમોઽસ્તુ ॥ ૫૩॥

વિદ્યાકારોદ્ભાવનીયં પ્રભિન્નં
સત્ત્વચ્છન્નં ધ્યેયમાત્મસ્વરૂપમ્ ।
સારં પારં પાવનાનાં પવિત્રં
તસ્મૈ રૂપં યસ્ય ચૈયં નમસ્તે ॥ ૫૪॥

નિત્યાર્જવં વ્યયહીનં ગુણૌઘૈ-
રષ્ટાઙ્ગૈર્યશ્ચિન્ત્યતે યોગયુક્તૈઃ ।
તત્ત્વવ્યાપિ પ્રાપ્ય યજ્જ્ઞાનયોગે-
પરં યાતાં યોગિનસ્તં નમસ્તે ॥ ૫૫॥

યત્સાકારં શુદ્ધરૂપં મનોજ્ઞં
ગરુત્મસ્થં નીલમેઘપ્રકાશમ્ ।
શઙ્ખં ચક્રં પદ્મગદે દધાનં

તસ્મૈ નમો યોગયુક્તાય તુભ્યમ્ ॥ ૫૬॥

ગગનં ભૂર્દિશશ્ચૈવ સલિલં જ્યોતિરેવ ચ ।
વાયુઃ કાલશ્ચ રૂપાણિ તસ્ય તસ્મૈ નમોઽસ્તુ તે ॥ ૫૭॥

પ્રધાનપુરુષૌ યસ્ય કાર્યાઙ્ગત્ત્વે નિવત્સ્યતઃ ।
તસ્માદવ્યક્તરૂપાય ગોવિન્દાય નમોઽસ્તુ તે ॥ ૫૮॥

યઃ સ્વયં પઞ્ચભૂતાનિ યઃ સ્વયં તદ્ગુણઃ પરઃ ।
યઃ સ્વયં જગદાધારસ્તસ્મૈ તુભ્યં નમો નમઃ ॥ ૫૯॥

પરઃ પુરાણઃ પુરુષઃ પરમાત્મા જગન્મયઃ ।
અક્ષયો યોઽવ્યયો દેવસ્તસ્મૈ તુભ્યં નમો નમઃ ॥ ૬૦॥

યો બ્રહ્મા કુરુતે સૃષ્ટિં યો વિષ્ણુઃ કુરુતે સ્થિતિમ્ ।
સંહરિષ્યતિ યો રુદ્રસ્તસ્મૈ તુભ્યં નમો નમઃ ॥ ૬૧॥

નમો નમઃ કારણકારણાય દિવ્યામૃતજ્ઞાનવિભૂતિદાય ।
સમસ્તલોકાન્તરમોહદાય પ્રકાશરૂપાય પરાત્પરાય ॥ ૬૨॥

યસ્ય પ્રપઞ્ચો જગદુચ્યતે મહાન્
ક્ષિતિર્દિશઃ સૂર્ય ઇન્દુર્મનોજવઃ ।
વહ્નિર્મુખાન્નાભિતશ્ચાન્તરીક્ષં
તસ્મૈ તુભ્યં હરયે તે નમોઽસ્તુ ॥ ૬૩॥

ત્વં પરઃ પરમાત્મા ચ ત્વં વિદ્યા વિવિધા હરે ।
શબ્દબ્રહ્મ પરમ્બ્રહ્મ વિચારણપરાત્પરઃ ॥ ૬૪॥

યસ્ય નાદિર્નમધ્યઞ્ચ નાન્તમસ્તિ જગત્પતેઃ ।
કથં સ્તોષ્યામિ તં દેવં વામનો ગોચરાદ્બહિઃ ॥ ૬૫॥

યસ્ય બ્રહ્માદયો દેવા મુનયશ્ચ તપોધનાઃ ।
ન વિવૃણ્વન્તિ રૂપાણિ વર્ણનીયઃ કથં સ મે ॥ ૬૬॥

સ્ત્રિયા મયા તે કિં જ્ઞેયા નિર્ગુણસ્ય ગુણાઃ પ્રભોઃ ।
નૈવ જાનન્તિ યદ્રૂપં સેન્દ્રા અપિ સુરાસુરાઃ ॥ ૬૭॥

નમસ્તુભ્યં જગન્નાથ નમસ્તુભ્યં તપોમય ।
પ્રસીદ ભગવંસ્તુભ્યં ભૂયો ભૂયો નમો નમઃ ॥ ૬૮॥

ઇતિ કાલિકાપુરાણે દ્વાવિંશોઽધ્યાયાન્તર્ગતં

સન્ધ્યાકૃતં હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Sandhyakritam Hari Stotram*

pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*